श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ श्रीहयग्रीवस्रग्धरा ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*] This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहयग्रीवस्रग्धरा ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अग्रे पश्यामि तेजः किमपि हयमुखं वर्धकं वारिराशेः
विद्यारूपस्य हृद्यं विशदशशिनिभं पद्मजाताभिनन्द्यम्।
शङ्खं चक्रं च पुस्तं विवृतिरतिमतीं ज्ञानमुद्रां च लक्ष्मीं
बिभ्रद् विभ्राजमानं श्रुतिततिमहितं लोचनानेकदृश्यम्॥ १ ॥

अग्रे पश्यामि नित्यं हयवदनमहं धाम मान्यं पवित्रं
शीतं विद्योतमानं मधुरमतितमां मङ्गलं दर्शनीयम्।
दुग्धाम्भोधेरुदीतां कमलवनसखीं लालयद्वामभागे
लक्ष्मीमङ्के निविष्टां शशिनमधिवसद् दिव्यभव्यानुभावम्॥ २ ॥

अग्रे पश्यामि भूयः धवलतममहं धाम सर्वोत्तमं तत्
लक्ष्म्या वामाङ्कभाजा मृदुलनिजभुजाश्लिष्टपृष्ठं वरिष्ठम्।
वाजीन्द्रास्यं स्वहेषाविधुतनतजनानन्तनानाविधाघं
मानातीतानुभावं मुनिजनमनसां लक्ष्यमेकं पवित्रम्॥ ३ ॥

अग्रे पश्यामि भान्तं धवलमतितरां वाजिवक्त्रं पुराणं
येन प्रेष्ठेन कामं जित इह महसा शीतशुद्धेन सोऽयम्।
नित्यं धत्ते निषण्णं निजसुभगतनौ दुग्धपाथोधिजातः
चन्द्रोऽयं देवदेवं विधिविहिततपोजातसञ्जातमूर्तिम्॥ ४ ॥

अग्रे पश्यामि नाथं मतिकृतिविहृतं वामभागाङ्कभाजा
विद्यामूर्त्या श्रिया यः करकमलजुषा दिव्यसौरभ्यभाजा।
लीलापद्मेन संवीजितनिजवदनः श्रान्तिहीनो नितान्तं
नित्यं वेदांस्तदर्थानपि किल कथयन् तं पुमांसं हयास्यम्॥ ५ ॥

www.prapatti.com

दृग्भ्यां पद्माकृतिभ्यां दिनकररजनीकान्ततुल्याकृतिभ्यां
चक्रश्रीशङ्खराड्भ्यां विरचितनिमिषोन्मेषलीलाभराभ्याम्।
आभ्यां देवादिदेवो हयवरवदनो मानुषाकारदेहः
संसारेऽस्मिन् चरन्तं हयमिव सरयं मानुषं मां स पातु॥ ६ ॥

आस्तामस्मत्पुरस्तादनघशुभगुणो देवदेवो हयास्यः
हेषाविक्षिप्ततत्तन्विमतकलकलो दिव्यसौन्दर्यभूमिः।
हत्वा सद्यस्सुदुष्टं मधुमसुरवरं वेधसः कर्णजाते
वर्षन् हर्षेण रस्याः मधुमयफणितीः वेदवेदाङ्गसक्ताः॥ ७ ॥

अङ्के कृत्वा कृशाङ्गीं हिमकरनिलयश्शङ्खक्लृप्ताभिषेकां
शीतैस्संवेपमानां इतरकरगतं दर्शयन् चक्रराजम्।
आश्वास्याश्लिष्य हेषामयमधुररवैर्देवदेवो हयास्यः
नित्यं मच्चित्तरङ्गे कलयतु नटनं मोदबोधस्वरूपः॥ ८ ॥

वेगात् प्रत्यूहहीनं जनयितुमिव नस्सन्नतानां मुखेभ्यः
वाचामुच्चैः प्रवाहं विहितहितमहावाजिवक्त्रावतारः।
श्रीमान् वागीश्वरोऽयं धवलशुभतनुश्शुद्धसत्त्वस्वरूपः
सत्वं नस्संविधत्तां प्रकटितकरुणो नीरजो निस्तमस्कम्॥ ९ ॥

मन्दोऽप्यानन्दपाथोनिधिकुहरगतान् कर्तुमीष्टे बुधेन्द्रान्
वाचामुच्चैर्विलासैर्नवरसभरितैश्श्रीहयास्यो यदि स्यात्।
किञ्चिच्चित्ते निविष्टो विमलनिजतनुश्शङ्खचक्रे सपुस्तां
व्याख्यामुद्रां च लक्ष्मीं करकृतकमलां संवहन् सुस्मितास्याम्॥ १० ॥

स्रग्धरां श्रीनिधेरुत्थितां यो वहेत्
वाजिराजाननं वर्णयन्तीमिमाम्।
स्रग्धरास्रग्धरः कण्ठतोस्मीति सः
वादिराजाजितस्सज्जयं विन्दति॥ ११ ॥

॥ इति श्रीहयग्रीवस्रग्धरा समाप्ता ॥

www.prapatti.com